# शुद्धशाङ्करप्रक्रियाभास्करः

## १–२

परिपोषकसंस्था –

वेदान्तविचारसंघः, मैसूरु नगरम्.

123

अध्यात्मप्रकाशकार्यालयः,

होळेनरसीपुरम्.

# Shuddha Shankara Prakriya Bhaskarah

---

Gentle Reader,

Perhaps you already know that we have been busy publishing a number of new and original Sanskrit works calculated to create an active interest on the part of students of Vedanta in appreciating the Unique Method of teaching employed in the Upanishads. The most recent of such works is the first volume of the *Vedanta Prakriya-Pratyabhijna* by Sri Swami Satchidanandendra Saraswati Maharaj, which contains a comparative study of all the important Vedantic systems available from the most ancient times up to the time of Sarvajnatma. In the second volume of that work, Swamiji proposes to bring his account of the history of Vedantic thought down to our own times.

The present series of booklets is intended for readers who wish to have an outline of the thoughts contained in that larger work serving as an introduction to it without taxing their brain with an elaborate study of the details at the very outset. It is, however, complete in itself so far as it goes without demanding any thing more than an elementary acquaintance with Shankara's works. It consists of a graduated course of Vedantic study in very easy instalments that rouse and sustain the curiosity of the reader to know more and more of Shankara's system.

(*see the inside of the back-cover*)

अध्यात्मग्रन्थावलिः

# शुद्धशाङ्करप्रक्रियाभास्करः

तत्र

# १. वेदान्तसिद्धान्तनिर्णयः

# २. शाङ्करसंप्रदायनिर्णयश्च

रचयितारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १२१

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

(हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे.)

१९६४

First printed 1964
1000 Copies

All rights reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur

(Apply to the Chairman for permission to translate)

Registered under the Copy Right Act 1957.

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press, Holenarsipur

# अशुद्धिशोधनम्

अ = अधरोत्तरं गणने

| पत्रपार्श्वम् | | पंक्तिः | शुद्धः पाठः |
|---|---|---|---|
| विज्ञप्तौ | 4 | अ. १० | प्रदर्शयितुं |
| | २ | ४ | द्वैतवेदान्तप्रभेदान् |
| | १० | अ. ३ | पाञ्चरात्र |
| | १५ | ११ | इति कारिकापि |
| | १६ | अ. ६ | ('बुद्धिः' इति पदमपनेयम् ) |
| | २४ | ८ | .... (च) समुदाजह्रुः |
| | २८ | ११ | इत्यभ्युपागामि |

# वेदान्तरसिकेषु विज्ञप्तिः

अयि महाभागाः, सुविदितमेतत् सर्वेषां वः, श्रीमच्छङ्करभगवत्पादानां धवलकीर्तिरिदानीम् अखिलभूमण्डलव्यापिनीति । तदीयभाष्याणि, तत्कर्तृकत्वेन प्रथितानि कतिचित् प्रकरणानि च यथैव भारते देशे तथैव विदेशेष्वपि भाषान्तरानुवादभूषितानि तत्त्वजिज्ञासून् वेदान्तदर्शनसौन्दर्यसमाकृष्टचित्तान् समापादयन्ति विराजन्त इति च ॥

इदानीं नास्ति तादृशो जनोऽस्मद्देशे देशान्तरे वा कृतबुद्धित्वेन परिगणितो यस्य श्रुतिगोचरं नाभूत् शाङ्करवेदान्तदर्शनम् । अद्यतनसकलविद्यानिलयेषु वा सांप्रदायिकपद्धत्यनुसारिसंस्कृतविद्याशालासु वा यस्मिन् कस्मिंश्चिदपि विद्यास्थाने निष्णाताः शङ्करभगवत्पादानां वेदान्तप्रस्थानविषये ईषदादरप्रकटनम् आत्मनो गौरवावहमित्यवश्यं मन्वते । शाङ्करवेदान्ताभ्यासासक्तास्तु परीक्षा-निमित्तेन नियमितान् तांस्तान् व्याख्यानोपव्याख्यानसहितान् भाष्यभागानधीत्य विद्वत्पदाङ्किता भूयास्मेति सोत्कण्ठमाशासते ; अद्वैतविद्वत्प्रकाण्डाश्च विविध-व्याख्यानप्रस्थानप्रकारानुसारेण शाङ्करवेदान्तमधिकृत्य भाषणग्रन्थरचनादिद्वारेण तत्र तत्र सभासु वाक्यार्थनिर्णयार्थं तद्विद्भिः सह संवादेन च यशोधनार्जनेन संतुष्यन्ति । भाष्यान्तरप्रस्थानेषु, पाश्चात्यतत्त्वचिन्तकोपज्ञप्रस्थानेषु वा कृत-परिश्रमास्तर्करसिकास्तु शाङ्करवेदान्तप्रशंसादूषणान्यतरभूयिष्ठभाषणलेखनैः स्व-वैदुष्यं विख्यापयिषन्ति । अपि च नाल्पसङ्ख्याकाः सन्ति निवासिनो देशेऽस्मिन् ये स्वस्वप्रान्ते प्रतिसंवत्सरं शङ्करजयन्त्याद्युत्सवसमारम्भेण भगव-त्पादेष्वात्मनो भक्त्यतिशयम् आविष्कुर्वन्ति । तदेवं सर्वथापीदानीं दिगन्त-विश्रान्तकीर्तयो भगवत्पादा इति कस्य तद्भक्तस्य मुदे न स्यात् ?

इदं त्वसन्तृप्तिस्थानं तत्त्वपक्षपातिनां यदेतादृशसंभ्रमयुता अप्येत-द्देशीया देशान्तरीया वा विचक्षणाः, नैव चित्तं बध्नन्ति शाङ्कराद्वैतसतत्त्व-निर्धारणे इति । महनीयकीर्तयो हि भगवत्पादाः प्रचलन्तीष्वेव नैकासु वेदान्त-व्याख्यानरूपासु प्राचीनाद्वैतवृत्तिषु तदादृतप्रक्रियाविशेषैरसन्तुष्टाः स्वानि भाष्याणि प्राणैषुः, आविरकार्षुश्च तत्र विविधान् दोषानिति प्रसिद्धमेतत् ।

तत्रैवं स्थिते वस्तुवृत्तं जानाना आस्माकीना अपि पण्डिताः, पाश्चात्त्यविमर्शक-जनवदेव, 'द्वैतमतखण्डनार्थमेव सौगतादिवेदबाह्यखण्डनार्थमेव च भाष्याणि न्यभान्त्सुर्भगवत्पादाः' इति वदन्ति, व्याख्यानकाराणां प्रस्थानानि परस्पर-विरुद्धत्वेन स्पष्टभासमानान्यपि, अद्वैतप्रतिपत्त्युपायदर्शकत्वात् न दुष्यन्ति-इति कथञ्चिन्मनःसमाधानं दधते । भाष्यकारैर्दूषितान्येव च प्राचीनमतानि विपरिणमय्य रूपान्तरेण स्वीकुर्वते । आधुनिकविद्याभ्यासपद्धतिमनुरुन्धाना अपि सकलविद्यानिलयाधिकारिणोऽपि, तैरेव पण्डितैः प्रभाविताः परस्परविरुद्ध-व्याख्यानसमेतानपि भाष्यग्रन्थान् परीक्षापठ्यग्रन्थजातमध्ये संविदधते । व्याकुलयन्ति चाध्येतृजनचित्तम् इत्यहो कालवैभवम् !

तदेतादृशीं शाङ्करवेदान्ताभ्यासक्रमस्य दुरवस्थाम् आकलयता मया वेदान्ततत्त्वजिज्ञासुजनचित्तक्लेशपरिहारार्थं शङ्करप्रस्थानयाथार्थ्यमाविश्चिकीर्षुणा माण्डूक्यरहस्यविवृतिः, अध्यासभाष्यव्याख्या सुगमाख्या, जिज्ञासासूत्र-भाष्यार्थतत्त्वविवेचनी – इत्यादयो ग्रन्था विरचिताः । शुद्धशाङ्करप्रक्रियानिर्धार-णावश्यकतां प्राचीनार्वाचीनाद्वैतिप्रस्थानानां च केषाञ्चित् तादृशप्रक्रियाविरुद्ध-त्वाद् दोषकलङ्कितानां च प्रदिदर्शयिषया वेदान्तप्रक्रियाप्रत्यभिज्ञाभिधो विस्तीर्ण-तरो निबन्धोऽपि विदुषां परिशीलनार्थं प्राणायि । इदानीं तु सुकुमारमतीनां सङ्क्षेपाभिरुचीनां कृते शुद्धशाङ्करप्रक्रियाभास्करं नामेमं ग्रन्थं भागभागशः प्रस्तौमि स्वल्पमूल्येनैवाप्यस्य ग्रन्थभागं तत्तद्विषये सुनिश्चितार्थत्वं यथा सिध्येत तादृशानामप्यधिकारिणामिति ॥

अथात्र प्रथमे भागे मम प्रमादात् सीसकाक्षरयोजककरकृतापराधाद् वा जातान् दोषान् आविष्कृत्योपकर्तुं प्रार्थये विपश्चिदपश्चिमान् येनाधमर्ण्य-प्रकटनपूर्वकं ग्रन्थं संस्कर्तुं प्रभवेय द्वितीयमुद्रणावसरे इति

शङ्करचरणस्मरणावलम्बी

ग्रन्थकर्ता

॥ ॐ ॥

# शुद्धशाङ्करप्रक्रियाभास्करः

## १. वेदान्तसिद्धान्तनिर्णयः

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो
नमो महद्भ्यो नमो गुरुभ्यः

—:०:—

१. शङ्करप्रत्यर्थिद्वैतिनः साङ्ख्यादय एव – इह खलु वेदान्तसिद्धान्तत्वेन प्रथितेषु भिन्नभिन्नाचार्यैरुपस्थापितेषु, अद्वैत-विशिष्टाद्वैतशुद्धाद्वैतद्वैताद्वैतादिप्रभेदैर्भिन्नेषु मध्ये, अद्वैतसिद्धान्त एव तथात्वेन श्रीशङ्करभगवत्पादानामभिमत इत्यत्र नास्ति विप्रतिपत्तिर्वादिनां लौकिकानां वा। तत्र यद्यपि विशिष्टाद्वैतादिवादिनोऽपि स्वस्वाभिमत एव वेदान्तार्थः, अतो विशिष्टाद्वैतादिसिद्धान्त एव वेदान्तेषु प्रति-पिपादयिषितः – इत्यभिनिविष्टाः, उपन्यस्यन्ति च स्वस्वसंप्रदाय-प्रवर्तकान् पूर्वाचार्यान् तत्र तत्र प्रमाणत्वेन, तथापि शङ्करभगवत्पाद-प्रस्थानादर्वाचीनान्येव तानि सर्वाण्यप्यद्वैतेतरप्रस्थानानि–इत्यत्र बल-वदस्ति गमकम्, शाङ्करभाष्येष्वेव ॥

तथा हि भगवत्पादाः स्वीयभाष्येषु साङ्ख्यादीनेव द्वैतिनः प्रतिवादित्वेन स्वीकृत्य निराकार्षुः, न द्वैतविशिष्टाद्वैतादिवेदान्तसिद्धान्तानुयायिनः । साङ्ख्यादयोऽपि अद्वैतमेव वेदान्तसिद्धान्तत्वेन परामृशन्ति स्म स्वग्रन्थेषु, न त्वेव जातुचिदपि अधुनातनद्वैतवेदान्तिनः। विशिष्य च साङ्ख्योत्थापितदूषणान्येव समुद्धर्तुं यत्नः कृतोऽस्ति शाङ्करभाष्ये, न त्वद्वैतीतरवेदान्त्युत्थापितानि – इतीदमपि गमकं यथोक्तनिर्णये । यदि हि भगवत्पादसमये द्वैतादिवेदान्तसिद्धान्तप्रभेदा अपि प्राचलिष्यन्, तर्हि अवश्यं तान्यपि साङ्ख्यादिवदेव कुत्रचित् निराकरणीयपक्षकुक्षौ न्यवेशयिष्यन्त ; तैरुत्थापिता अपि दोषा समुद्धरणाय आनेष्यन्त । इतरथा हि भगवत्पादसंमतमद्वैतमेव वेदान्तसंमतं दर्शनमिति न निराकुलं प्रतिष्ठापितं स्यादिति । न त्वेव ते द्वैतादिवेदान्तप्रस्थानभेदाः साङ्ख्यादिभिर्भगवत्पादैर्वा परामृष्टा दृश्यन्ते क्वचिदपि । अतस्तदानीं नासन् द्वैतादिसिद्धान्तप्रभेदा इत्यवगच्छामः ॥

किञ्च, भगवत्पादीयभाष्ये वेदान्तवाक्यानामैदम्पर्यं निश्चितव्ये **'ईक्षतेर्नाशब्दम्'** (वे. सू. १-१-५) इत्यारभ्य आपरिसमाप्तेः प्रतिपक्षरीत्या वेदान्तवाक्यव्याख्यातृषु मध्ये साङ्ख्या एव प्राधान्येनोपात्ताः, वैशेषिकाद्यचेतनकारणवादिनस्तु अतिदेशेनैव प्रत्याख्याताः **'एतेन सर्वे व्याख्याता व्याख्याताः'** (वे. सू. १-४-२८) इति। तत्र द्वैत्यादिवेदान्तिनो नाम्नापि न निर्दिष्टाः क्वचिदपि । तदेवम्, इदमवगम्यते यद् भगवत्पादानां काले नासन्नेव द्वैतादिसिद्धान्तावलम्बिनो वेदान्तिनः, येन तेऽपि साङ्ख्यादिवत् परामृक्ष्यन्त तैः परपक्षयुक्तिप्रत्याख्यानावसरे, वेदान्तवाक्यार्थनिर्धारणावसरे वा–इति ॥

एतेनेदमपि सिद्धं भवति द्वैतादिवेदान्तसिद्धान्तपक्षस्वीकर्तारो नैवासन् शारीरकप्रणयनकाले इत्येव भगवत्पादानां मतमिति । अन्यथा हि कथं नाम सूत्राक्षरयोजनावसरे तादृशसिद्धान्तावलम्बिनां मतानि तैः कुत्रचिदपि किञ्चिदप्यकटाक्षितानि भवेयुरिति ॥

**२. भगवत्पादकाले वेदान्तिनः सर्वे ब्रह्मात्मैकत्ववादिन एव** – अपि च, न केवलं द्वैत्यादिवेदान्त्यभावो भगवत्पादानां काले क्वचिदपि तत्परामर्शाभावबलादेवोन्नीयते, किं तु साक्षाद्वचनमपि दृश्यते भाष्ये तदानीं तदभावाभिधायकम्–इत्यतोऽपि । तद्यथा बृहदारण्यक-भाष्ये –

(१) सर्वोपनिषत्सु हि विज्ञानात्मनः परमात्मना एकत्वप्रत्ययो विधीयत इत्यविप्रतिपत्तिः सर्वेषामुपनिषद्वादिनाम् ॥

बृ. भा. २-१-२०, पा. ७३८.

इति । सूत्रभाष्ये चेदं वाक्यमस्ति –

(२) सम्यज्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनाम् अभ्युप-गमः ॥ सू. भा. २-१-११, पा. १९३

इति । यदि जीवब्रह्मभेदवादिनो भगवत्प्रसादतद्भक्त्यादिसाधनकमोक्ष-वादिनो वा तदात्वे प्रसिद्धा अभविष्यन्, तर्हि विज्ञानात्मपरमात्मैक्य-मेवोपनिषत्प्रतिपाद्यमित्येतत् सर्ववेदान्तिसंप्रतिपन्नमिति नैवोदघोष्यता-चार्यैः, मोक्षस्य सम्यज्ज्ञानमात्राधिगम्यत्वं सर्वमोक्षवादिसंप्रतिपन्नमिति वा । उद्घोषितं तु । तेनेदं स्फुटमवगम्यते, यत् तत्काले अद्वैतेतरवेदान्त-सिद्धान्तभेदा नैवासन्निति ॥

३. जीवेश्वरभेदवादिनो वेदान्तिनो नैवासन् शारीरककर्तुः काले – शारीरकमीमांसाप्रणेत्रा बादरायणाचार्येण जीवब्रह्मसम्बन्धविषये विप्रतिपन्ना ब्रह्मवादिनः पूर्वाचार्यास्त्रेधा वर्गीकृत्य दर्शिताः – 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः', 'उत्क्रमिष्यत एवंभावादित्यौडुलोमिः', 'अवस्थितेरिति काशकृत्स्नः' (वे. सू. १-४-२०, २१, २२, पा. १७०, १७१) इति । तदिदं सूत्रत्रयं मैत्रेयीब्राह्मणस्थवाक्यार्थनिर्णयाय प्रवृत्तम् । तत्र हि 'न वा अरे पत्युः कामाय' इत्युपक्रम्य 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इति प्रियसंसूचितेन भोक्त्रात्मना उपक्रम्य 'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति' इति परमात्मोपदेशः कृतः । तदिदं जीवात्मपरमात्मनोरभेदेनोपक्रमणं कथमुपपाद्यताम् ? – इत्यत्र विप्रतिपन्ना आश्मरथ्यादयः । तत्र सूत्राभिप्रायम् एवं व्याचष्टे भाष्यकारः –

> (१) प्रतिज्ञासिद्ध्यर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमिति आश्मरथ्य आचार्यो मन्यते ॥ सू. भा. १-४-२०, पा. १७०.

अत्र 'अभेदांशेनोपक्रमणम्' इत्युक्तेः, भेदांशोऽप्यभिमत इति गम्यते । तथा चाह वाक्यशेषे भाष्यकृत् –

> (1) आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतम्, तथापि 'प्रतिज्ञासिद्धेः' इति सापेक्षत्वाभिधानात् कार्यकारणभावः कियानप्यभिप्रेत–इति गम्यते ॥ पा. १७१.

इति ॥

[जीवब्रह्मणोः कार्यकारणभावो मृद्घटयोरिव, घटस्य मृत्सकाशादिव ब्रह्मणः सकाशाज्जीवस्य भेदोऽभेदश्च इत्येतदाचार्यस्य मतमित्यर्थः ॥]

(२) विज्ञानात्मन एव देहेन्द्रियमनोबुद्धिसङ्घातोपाधिसंपर्कात् कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादिसङ्घातात् उत्क्रमिष्यतः, परमात्मैक्योपपत्तेरिदम् अभेदेनोपक्रमणम् – इति औडुलोमिराचार्यो मन्यते ॥ सू. भा. १-४-२१, पा. १७०, १७१.

अत्र जीवस्य संसारावस्थायाम् उपाधिवशतो भेद एव, उत्क्रान्त्यनन्तरं तु अभेदः; तदिह भविष्यद्वृत्त्या अभेदोऽङ्गीकृतः श्रुत्या – इति औडुलोमिमतमिति गम्यते। तथा ह्युक्तं भाष्यकृतापि –

(2) औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते ॥ पा. १७१.

इति ॥

[न तु युगपद् भेदाभेदौ, आश्मरथ्यपक्ष इवेत्यभिप्रायः ॥]

(३) अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानात् उपपन्नमिदमभेदेनोपक्रमणम् – इति काशकृत्स्न आचार्यो मन्यते ॥
सू. भा. १-४-२२, पा. १७१.

अत्र तु 'विज्ञानात्मभावेनापि' इत्यपिशब्दात् संसारदशायामपि परमात्मभावो न हीयत इति काशकृत्स्नमतमिति गम्यते। तथा च भाष्योक्तिः –

(3) काशकृत्स्नस्य आचार्यस्य अविकृतः परमेश्वरो जीवो नान्य इति मतम् ॥ पा. १७१

इति ॥

सर्वथापि त्वत्र मोक्षे जीवब्रह्मणोरभेदः सर्वसंमतः। अतो 'बद्धान्मुक्ताच्च प्रत्यगात्मनोऽत्यन्तविलक्षणः परमात्मा' (वे. दी. पा. ११४) इति वदन्तो रामानुजादिसजातीया विशिष्टाद्वैतिवेदान्तिनो

नासन्नेव सूत्रप्रणयनकालेऽपीति भाष्यकाराभिप्रायो गम्यते । परमात्मनोऽत्यन्तभिन्नानां तदनुचराणां नीचोच्चभावंगतानां जीवानां वार्तापि न वेदान्तगोष्ठीषु श्रूयते स्म तदात्वे इति च ॥

४. अद्वैतप्रक्रियाभेदा बहवो भाष्ये परामृष्टाः – अपि च प्रस्थानत्रयभाष्येषु बहुशो दरीदृश्यन्ते अद्वैतिनामेव प्रक्रियाभेदास्तत्र तत्र परामृश्य निराकृताः । तद्यथा –

(१) यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते । .... 'आत्मा वा अरे द्रष्टव्यः', 'य आत्मा अपहतपाप्मा...सोऽन्वेष्टव्यः स विजिज्ञासितव्यः', 'आत्मेत्येवोपासीत', 'आत्मानमेव लोकमुपासीत', 'ब्रह्म वेद ब्रह्मैव भवति'– इत्यादिविधानेषु सत्सु कोऽसावात्मा ? किं तद् ब्रह्म ? – इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः ' नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म' इत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति ॥

सू. भा. १-१-४, पा. १२, १३.

अत्रोपासनादेव केवलात् विदेहमुक्तिर्भवित्री – इत्युक्तम् । उपासनाया अविद्यानिवर्तकत्वमप्यस्ति दृष्टफलम् इत्यप्यङ्गीकृतं दृश्यते बृहदारण्यकभाष्ये एतस्यैव मतस्यानुवादावसरे –

(२) यथा च कृत्स्नस्य दर्शपूर्णमासादिप्रकरणस्य दर्शपूर्णमासादिविध्युद्देशत्वेनोपयोगः, एवम् औपनिषदात्मोपासनप्रकरणस्य आत्मोपासनविध्युद्देशत्वेनैव उपयोगः । 'नेति नेति', 'अस्थूलम्', 'एकमेवाद्वितीयम्', 'अशनायाद्यतीतः' इत्येवमादिवाक्यानाम् उपास्यात्मस्वरूपविशेषसमर्पणेनोपयोगः । फलं च मोक्षः, अविद्यानिवृत्तिर्वा ॥

बृ. १-४-७, पा. ६६१.

अत्र रामानुजीयमते इवैव अविद्यानिवृत्तये उपासनात्मिकैव विद्या विहिता श्रुतिषु – इत्युक्तं यद्यपि, तथापि 'नेति नेति' इत्यादिविशेषनिराकरण-श्रुतीनामपि उपास्यस्वरूपसमर्पकतयैव विनियोग उक्त इति अद्वैतिन एवैते अनूदिता वादिन इति स्पष्टम् ॥

(३) नन्वनेकात्मकं ब्रह्म। यथा वृक्षोऽनेकशाखः, एवम् अनेक-शक्तिप्रवृत्तियुक्तं ब्रह्म । अतः एकत्वं नानात्वं चोभयमपि सत्यमेव । यथा 'वृक्षः' इत्येकत्वम् । 'शाखाः' इति नानात्वम्। यथा च समुद्रा-त्मना एकत्वम्, फेनतरङ्गाद्यात्मना नानात्वम् । यथा च मृदात्मना एकत्वम्, घटशरावाद्यात्मना नानात्वम् । तत्र एकत्वांशेन ज्ञानान्मोक्ष-व्यवहारः सेत्स्यति, नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिक-व्यवहारौ सेत्स्यतः-इति । एवं मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति ॥
सू. भा. २-१-१४, पा. १९७.

एतन्मतं भर्तृप्रपञ्चानामिति भाति । यतस्तेषामभिप्रायः एतादृश एवा-नूदितो बृहदारण्यकभाष्ये 'पूर्णमदः पूर्णमिदं' इति मन्त्रव्याख्यानावसरे पञ्चमाध्यायव्याख्यानप्रारम्भे (बृ. भा. पा. ९५१) ॥

(४) सकृच्छ्रुतौ च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगमः-इति चेत् । न । आवृत्तावपि तदनुपपत्तेः । यदि हि 'तत्त्वमसि' इत्येवञ्जातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्, ततः, तदेवावर्त्य-मानम् उत्पादयिष्यतीति का प्रत्याशा स्यात् ? अथोच्येत-न केवलं वाक्यं कञ्चिदर्थं साक्षात्कर्तुं शक्नोति ; अतः युक्त्यपेक्षं वाक्यम् अनुभावयिष्यति ब्रह्मात्मत्वम् इति । तथापि, आवृत्त्यानर्थक्यमेव । सापि हि युक्तिः, सकृत् प्रवृत्तैव स्वमर्थम् अनुभावयिष्यति । अथापि स्यात् – युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते, न विशेषविषयम् । यथा 'अस्ति मे हृदये शूलम्' इत्यतो वाक्यात् गात्रकम्पादिलिङ्गाच्च शूल-सद्भावसामान्यमेव परः प्रतिपद्यते, न विशेषम् अनुभवति यथा स एव

शूली ; विशेषानुभवश्च अविद्याया निवर्तकः । ततः, तदर्था आवृत्तिः – इति चेत् । न । असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात् । न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्याम् अनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्याम् अवगन्तुं शक्यते ॥

सू. भा. ४–१–२, पा. ४६१.

अत्रानूदिता एकदेशिप्रस्थानभेदास्त्विमे – (अ) तत्त्वमस्यादिवाक्यश्रवणावृत्त्या ब्रह्मात्मत्वज्ञानमुत्पद्यते ; (आ) वाक्यश्रवणयुक्त्योः समुच्चितयोरावृत्त्या साक्षात्कारलक्षणं ज्ञानमुत्पद्यते ; (इ) युक्तिसहितवाक्यश्रवणयुक्त्यनुसंधानसहितं ज्ञानं परोक्षम्, तदावृत्त्या च विशेषानुभवलक्षणम् अपरोक्षज्ञानम् इति च । अत्र प्रथमतृतीयपक्षौ नैष्कर्म्यसिद्धावपि प्रकारान्तरेण अनूदितौ दूषितौ च । तद्यथा –

(१) एवमुपसंहृते केचित् स्वसंप्रदायबलावष्टम्भादाहुः – यदेतद् वेदान्तवाक्यात् अहं ब्रह्मेति विज्ञानं समुत्पद्यते, तन्नैव स्वोत्पत्तिमात्रेण अज्ञानं निरस्यति ; किं तर्हि, अहन्यहनि द्राघीयसा कालेन उपासीनस्य सतः, भावनोपचयात् निश्शेषमज्ञानमपगच्छति । 'देवो भूत्वा देवानप्येति' इति श्रुतेः ॥ नै. सि. १–६७, सं., पा. ४०.

[अत्र सकृद् वाक्यश्रवणेन जनितं ज्ञानम् अज्ञानविनाशने असमर्थम् इत्युक्तम् ; श्रवणजन्यवाक्यज्ञानाभ्यासस्वरूपं तु भावनोपचयलक्षणम् इति च । तदेतद् भाष्ये न स्फुटितम् ॥]

(२) अपरे तु ब्रुवते – वेदान्तवाक्यजनितम् 'अहं ब्रह्म' इति विज्ञानं संसर्गात्मकत्वाद् आत्मवस्तुयाथात्म्यावगाह्येव न भवति ; किं तर्हि, एतदेव गङ्गास्रोतोवत् सततम् अभ्यस्यतः, अन्यदेव अवाक्यार्थात्मकं विज्ञानान्तरम् उत्पद्यते, तदेव अशेषाज्ञानतिमिरोत्सारि – इति । 'विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति श्रुतेः – इति ॥

नै. सि. १–६७, संबन्धोक्तिः ॥

[अत्र भाष्योक्तस्तृतीयः पक्षो विशदीकृतः। प्रथमं ज्ञानं परोक्षमात्रम्। कुतः? संसर्गात्मकत्वात् - इति। स एव हेतुर्भाष्ये स्पष्टतया नोक्तः। आवृत्तिजन्यं ज्ञानम् अपरोक्षम्, तच्च श्रवणमात्रजन्यज्ञानादन्यदेव-इति तु समानमुभयत्रापि। भाष्ये युक्तिसहितज्ञानावृत्तिलक्षणं प्रसङ्ख्यानशब्द-वाच्यम् अपरोक्षज्ञानकारणमिति मतमपि पूर्वपक्षसंमतत्वेनानूदितम्। तत्तु सिद्धौ तृतीयाध्याये पृथगेवानूद्य खण्डितम् इति विशेषः॥]

**(५) केचित् पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति, उत्तराणि सिद्धान्तसूत्राणि-इत्येतां व्यवस्थाम् अनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति॥ सू. भा. ४-३-१४, पा. ४९७.**

इदं तु निर्विशेषं ब्रह्मानभ्युपगच्छतामुपासनेनैव ब्रह्मप्राप्तिं वदतां मतम्॥

**(६) यदप्याहुः - आकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलय-मुखेन अनाकारप्रतिपत्त्यर्था एव न पृथगर्था इति, तदपि न समीचीन-मिव लक्ष्यते॥ सू. भा. ३-२-२१, पा. ३६०.**

अत्र उपासनाधिकारे श्रुतानामपि ब्रह्मधर्माणां अनाकारब्रह्म-बोधनार्थत्वमेव भेदप्रविलयनद्वारा - इति वदतां विद्यमानस्यैव प्रपञ्चस्य भावनया प्रविलयं शास्त्रचोदितत्वेन स्वीकुर्वताम् अद्वैतवादिनां मतम् अनूदितम्॥

**(७) तत्र भागवता मन्यन्ते - भगवानेवैको वासुदेवो निरञ्जन-ज्ञानस्वरूपः परमार्थतत्त्वम्, स चतुर्धा आत्मानं प्रविभज्य प्रतिष्ठितः, वासुदेवव्यूहरूपेण, सङ्कर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेण, अनिरुद्धव्यूह-रूपेण च। वासुदेवो नाम परमात्मा उच्यते, सङ्कर्षणो नाम जीवः, प्रद्युम्नो नाम मनः, अनिरुद्धो नाम अहङ्कारः। तेषां वासुदेवः परा प्रकृतिः, इतरे सङ्कर्षणादयः कार्यम्। तम् इत्थंभूतं परमेश्वरं भगवन्तम्**

अभिगमनोपादानेज्यास्वाध्याययोगैः, वर्षशतम् इष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति ॥ सू. भा. २-२-४२, पा. २५९, २६०.

अत्रानूदिता भागवताः, मुक्तौ जीवब्रह्मणोरभेदं स्वीकुर्वाणाः। ब्रह्मण उत्पन्नो जीवः, उपासनेन भगवत्स्वरूपत्वमेव प्रतिपत्स्यत इति ब्रुवाणाः। एतेषां मतम् **गीताभाष्येऽपि** अनूदितम् –

(अ) 'इदं चान्यत् पाण्डित्यं केषाञ्चिदस्तु – क्षेत्रज्ञ ईश्वर एव; क्षेत्रं चान्यत् क्षेत्रज्ञस्यैव विषयः। अहं तु संसारी सुखी दुःखी च। संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन, ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेन–इति ॥ गी. भा. १३-२, पा. १९५

यद्यपीदानीं रामानुजीयाः आनन्दतीर्थीयाश्च प्राहुः 'वयं पाञ्चरात्रानुसारिणो भागवता एव' इति, तथापि भगवत्पादभाष्यप्रकटनकाले ये भागवतत्वेन प्रसिद्धाः, ते अद्वैतिन एवेति गम्यते। यथोदाहृतसूत्रभाष्यगीताभाष्ययोर्मुक्तौ जीवस्य ब्रह्मभावापत्तिकथनात्। अपि च 'भगवानेवैको वासुदेवो निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वम्' (सू. भा. पा. २५९), 'न च पञ्चरात्रसिद्धान्तिभिः, वासुदेवादिषु एकैकस्मिन्, सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद् भेदोऽभ्युपगम्यते; वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते।' (सू.भा. पा. २६१) इति च भगवत एवैकस्य परमार्थत्वं तस्य च परप्रकृतित्वं मन्यन्ते स्म – इति भाष्यकारैर्वर्णितानां निर्विशेषब्रह्मवादिनां विशिष्टाद्वैत्यादिवेदान्तिपक्षपातित्वे न प्रमाणमस्ति। तस्मात्, द्वैतविशिष्टाद्वैतादिभेदेन पञ्चरात्रमनुसृत्य सिद्धान्तान्तरमेवेदानीं सूत्रभाष्यप्रकाशनादर्वाक् कैश्चित् प्रस्थापितम् इत्युन्नीयते ॥

किञ्चान्यत् – जीवो ब्रह्मणः सकाशादुत्पन्नः, उपासनाबलेन पुनरपि ब्रह्मसायुज्यं गमिष्यतीति यथैव सूत्रभाष्ये भागवतमतमनूदितम्, तथैव जातब्रह्मवादनाम्ना एतन्मतं गौडपादैरप्यनूद्य दूषितमुपलभ्यते –

(आ) उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥ गौ. का. ३-१.

इति । व्याख्यातं चेदं वाक्यं भाष्यकारैः –

"उपासनाश्रितः उपासनाम् आत्मनो मोक्षसाधनत्वेन गतः, 'उपासकोऽहम्, ममोपास्यं ब्रह्म; तदुपासनं कृत्वा जाते ब्रह्मणि इदानीं वर्तमानः, अजं ब्रह्म शरीरपातादूर्ध्वं प्रतिपत्स्ये । प्रागुत्पत्तेश्चाजमिदं सर्वम्, अहं च । यदात्मकोऽहं प्रागुत्पत्तेः, इदानीं जातो, जाते ब्रह्मणि च वर्तमानः, उपासनया पुनस्तदेव प्रतिपत्स्ये' इत्येवम् उपासनाश्रितो धर्मः साधकः, येनैवं क्षुद्रब्रह्मवित्, तेनासौ कारणेन कृपणः दीनः, अल्पकः, स्मृतो नित्याजब्रह्मदर्शिभिः- इत्यभिप्रायः ॥
गौ. का. भा, पा. २०८.

इति । बृहदारण्यकभाष्येऽपि एतन्मतमनूदितमस्ति –

(इ) तस्मात् 'अहं ब्रह्मास्मि' इति न गृह्णीयात् ; परं हि देवमीशानं निकृष्टः संसारी आत्मत्वेन स्मरन् कथं न दोषभाक् स्यात् ? तस्मात्, नाहं ब्रह्मास्मि – इति युक्तम् । तस्मात् पुष्पोदकाञ्जलिस्तुतिनमस्कारबल्युपहारस्वाध्यायाध्ययनयोगादिभिः आरिराधयिषेत । आराधनेन च विदित्वा सर्वेशितृ ब्रह्म भवति ॥
बृ. भा. २-१-२०, पा. ७३५.

[ अत्रापि आराधनेन ब्रह्मभाव एव प्राप्यत्वेनोक्तः ॥ ]

तस्मात्, तदानींतना भागवता औडुलोमिपक्षमेव (वे. सू. १-४-२१) अनुसृत्य जीवः साधनानुष्ठानेन भगवत्सायुज्यं गच्छतीत्यास्थिता इति स्थितम् ॥

५. उपसंहारः – तदेवम् अद्वैतमेव वेदान्तसिद्धान्त इति सर्वसंप्रतिमन्नमासीत् शङ्करभगवत्पादेभ्यः पूर्वमपि, अद्वैतिमतभेदास्तु तैस्तैरादृतप्रक्रियाभेदाद् बहुधा भिन्ना[1] आसन् बहोः कालादपि। श्रीशङ्करभगवत्पादमतं पुनः प्रक्रियाविशेषावलम्बनादेव वेदान्तप्रस्थानान्तरेभ्यो विलक्षणम्–इति च सिद्धम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्र-सरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे वेदान्तसिद्धान्तनिर्णयो नाम प्रथमः किरणः

---

1. अत्र सूत्रभाष्यमेवाश्रित्य कतिचिदेव प्रस्थानान्तराणि दर्शितानि। अधिकं तु नातिचिरेण प्रचिकाशयिषित ‘वेदान्तप्रक्रियाप्रत्यभिज्ञा’ ग्रन्थतोऽधिगन्तव्यम् ॥

# २. शाङ्करसंप्रदायनिर्णयः

—:०:—

६. शाङ्करप्रक्रिया श्रीगौडपादसंप्रदायानुसारिणी — भगवत्पादैरभ्युपगतो वेदान्तप्रक्रियाविशेषो न तदुपज्ञः, किं तु तत्प्रागपि लब्धप्रसर आसीत्—इत्यत्र प्रस्थानत्रयभाष्येषु तेषामेवोद्घोषणादवगम्यते । तथा हि —

(१) 'तथा च संप्रदायविदो वदन्ति' (सू. भा. १-४-१४, पा. १६३), 'अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः' (सू. भा. २-१-९, पा. १९१).

इति च श्रीगौडपादाचार्याः सम्प्रदायवित्त्वेन महीकृताः । तत्रोदाहृतौ श्लोकौ तु —

(1) मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥
गौ. का. ३-१५.

(2) अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ गौ. का. १-१६.

इत्येतौ अद्यापि सर्वत्र सगौरवं पठनपाठनयोरद्वैतिभिः श्रीगौडपादीयत्वेन आद्रियेते, उपलभ्येते च मुद्रितमाण्डूक्यकारिकासु मध्ये—इति सर्वविदितम् ; श्रीगौडपादाश्च शङ्करभगवत्पादानां परमगुरुत्वेन प्रख्याता इति च । यद्यपि सूत्रभाष्ये यथोदाहृतश्लोकौ गौडपादकर्तृकत्वेन

नोल्लिखितौ, तथापि शङ्करभगवत्पादानां साक्षाच्छिष्यत्वेन सर्वसंप्रतिपन्नैः श्रीसुरेश्वराचार्यैर्विस्पष्टं लिखितमस्ति –

(3) निःशेषवेदसिद्धान्तविद्भिरपि भाषितम् ।
गौडाचार्यैरिदं वस्तु यथास्माभिः प्रपञ्चितम् ॥
मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥
बृ. वा. २-१-३८६, ३८७.

इति । एतेन सूत्रभाष्योदाहृतः श्लोको गौडपादीयत्वेन वार्तिककारसमये प्रथित आसीदित्यवगम्यते । 'गौडाचार्यैः' इत्यनेन गौडपादाचार्या एव विवक्षिता इति तु वार्तिकान्तरे स्पष्टतरोल्लेखात् गम्यते –

(4) श्लोकांश्च गौडपादादेर्यथोक्तार्थस्य साक्षिणः ।
अधीयतेऽत्र यत्नेन संप्रदायविदः स्वयम् ॥
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥
बृ. वा. ४-४-८८६, ८८७

इत्यादिस्थलेषु ॥

['तत्त्वम्' इत्यादिश्लोको वैतथ्यप्रकरणस्थो प्रक्रियान्तरानुसारिभिर्गौडपादीयत्वेन उदाहृत्य स्वमतानुसारेण व्याख्यातः । तत्प्रत्याख्यानायात्र वार्तिककारैः 'संप्रदायविदः' इति ते सोपहासं विशेषिताः ॥ ]

तदेवं तावत्, शङ्करभगवत्पादा गौडपादाचार्यैरादृतमेव संप्रदायमनुसृत्य स्वीयभाष्यं रचितवन्त इति सिद्धम् ॥

## ७. गौडपादाचार्या अपि स्वसंप्रदायज्ञान् परामृशन्ति–

गौडपादाचार्या अपि स्वीयकारिकासूपात्तं प्रक्रियाविशेषं प्राचीनसंप्रदायानुसारीत्येव मन्यन्ते स्म – इत्यत्रापि ज्ञापकं विद्यते–

(१) स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः ॥ गौ. का. २-५.
स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ गौ. का. २-३१.

अत्र 'त्रयः स्वप्नाः' (ऐ. १-१-१२), 'मायां तु प्रकृतिं विद्यात्' (श्वे.४-१०) इत्यादिश्रुतिमनुरुन्धानैर्वेदान्तसंप्रदायविद्भिः, जाग्रत्स्वप्नयोरैक्यं विश्वस्य स्वप्नमायासदृक्षत्वं चाभ्युपगतमस्ति – इत्युक्तम् ॥

(२) वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ गौ. का. २-३५.

अत्र तु परमात्मनो निर्विकल्पकत्वं निष्प्रपञ्चत्वं च वैदिकसंप्रदायावगतम् – इत्युक्तम् । एतेन 'न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः' (गौ.का. १-१४) कारिकापि संप्रदायसूचिनीति व्याख्याता-वेदितव्या ॥

यद्यपि प्रथमं प्रकरणं आगमप्रकरणत्वेन विख्यातं श्रुतिरित्येव भ्रान्ताः केचिदधुनातनवेदान्तप्रस्थानान्तरानुयायिनः । तद्यथा – रामानुजाचार्याः श्रीभाष्ये 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' इत्येतां कारिकां श्रुतित्वेव परिगृह्य 'तस्मिंश्चान्यो मायया संनिरुद्धः' इति श्रुत्या साकमुदाजह्रुः (श्री. भा. १-१-४, पा. ८८) । आनन्दतीर्थास्तु –

प्रमाणस्य प्रमाणं च बलवद् विद्यते मुने ।
ब्रह्मदृष्टानतोमन्त्रान् प्रमाणं सलिलेश्वरः ।
अत्र श्लोका भवन्तीति चकारैव पृथक् पृथक् ॥

इति आगमप्रकरणप्रारम्भ एव कारिका एता ब्रह्मदृष्टमन्त्रा इति 'गारुड' पुराणश्लोकोदाहरणेन अवधारयामासुः, तथापि गौडपादाचार्याणामेवेयम्

इत्यातस्थुषाम् अद्वैतिनामेव संप्रदायः शुद्धः, उक्तप्रकरणस्य श्रुतित्वे प्राचीनाचार्यसम्मत्यभावात् – इति प्रकरणचतुष्टयसज्ञानज्ञापनार्थाय त्रियमपि कारिका इह समुदाहृता । अधिकं त्वत्र माण्डूक्यरहस्यविवृतितोऽधिगन्तव्यमिति दिक् ॥

८. **भगवत्पादीयभाष्येषु दृश्यमानः संप्रदायश्रद्धा** – न केवलं गौडपादाचार्याः स्वसंप्रदायवित्त्वेन प्रमाणीकृता भाष्यकारेण, यावत् स्वीयभाष्येषु सर्वत्रापि तत्र तत्र सत्संप्रदाये परमादरः प्रकटितोऽस्ति सत्संप्रदायविदामेव सुवेद्यो वेदान्तार्थः – इति स्वाशयाविष्करणाय । गुरुशिष्यपरम्परया आगत एव हि वेदान्तोपदेशो याथार्थ्येन वेदान्तानां तात्पर्यमनुभवपर्यन्तताम् आपादयितुं शक्नोतीति । तदेवं संप्रदायागतत्वात्, परमार्थतत्त्वस्य आगमयितृत्वाच्च सम्यगुपदेशक्रमोऽयम् 'आगमः' इत्यपि व्यपदिश्यते । आगमयितृत्वं हि नाम सम्यगनुभवपर्यन्तज्ञानप्रापकत्वमिति । परमार्थतत्त्वं न प्रत्यक्षादिप्रमाणान्तरवेद्यमिति शास्त्राचार्योपदेशेनैव, साधकैरनुभवमारोपयितव्यम् – इति भाष्यकारः सुहृद्भूत्वा सावधारणम् उपदिशति –

(१) तद्विज्ञानार्थं विशेषेणाधिगमार्थम्, स निर्विण्णो ब्राह्मणः, बुद्धिः, गुरुमेव आचार्यं शमदमदयादिसंपन्नम् अभिगच्छेत् । शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात् – इत्येतद् 'गुरुमेव' इत्यवधारणफलम् ॥ मुं. भा. १–२–१२, पा. १५३.

(२) केचित्तु पण्डितंमन्या 'निराकारत्वादात्मवस्तु नोपैति अतो दुःसाध्या सम्यग्ज्ञाननिष्ठा–इत्याहुः । सत्यमेवेदं गुरुसंप्रदायरहितानाम् अश्रुतवेदान्तानाम्, अत्यन्तबहिर्विषयासक्तबुद्धीनाम्,

सम्यक्प्रमाणेषु अकृतश्रमाणाम् ; तद्विपरीतानां तु लौकिकग्राह्यग्राहक-द्वैतवस्तुनि सद्बुद्धिर्नितरां दुःसम्पाद्या ; आत्मचैतन्यव्यतिरेकेण वस्त्व-न्तरस्य अनुपलब्धेः ॥ गी. भा. १८-५०, पा. २८१.

(३) सत्यमेवम्, प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः, आगमेन तु शक्यत एव प्रत्याययितुम् ॥ के. १-४, पा. २०.

(४) (अ) एवं सुविज्ञेय आत्मा, आगमवता आचार्येण अनन्यतया प्रोक्तः ॥ का. भा. १-२-८, पा. ७२.

(आ) येयम् आगमप्रभूता मतिः, तार्किकादन्येनैव आगमाभिज्ञेन आचार्येण प्रोक्ता सती सुज्ञानाय भवति ॥
का. भा. १-२-९, पा. ७२.

(५) तस्मात्, असंप्रदायवित् सर्वशास्त्रविदपि मूर्खवदेव उपेक्ष-णीयः ॥ गी. भा. १३-२, पा. १९५.

[अत्र ध्यानेनेश्वरं साक्षात्कृत्वा तत्स्वरूपावस्थेन मोक्षः संपादयितव्यः -इति वदताम् अद्वैतिनामपि मतं न सांप्रदायिकमित्युक्तम् ॥]

९. भाष्ये द्रविडाचार्यपरामर्शः – गौडपादाचार्याणामेवैको ग्रन्थो भगवत्पादीयसंप्रदायस्थानामद्यत्वे पूर्णतया उपलभ्यते । आसन्नेव परम् अन्येऽपि एतत्संप्रदायस्थाः पूर्वाचार्या इत्यत्र लिङ्गानि सन्ति प्रस्थानत्रयभाष्येषु –

(१) यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥

उदाहृतः श्लोकोऽयं तैत्तिरीयकभाष्यप्रारम्भमङ्गलवाक्यस्थो द्वितीयः । एतेन आचार्यैः प्रमाणीकृताः पूर्वाचार्याः केचित् सर्वेषामपि वेदान्तानां व्याख्यानं कृतवन्त इत्यवगम्यते ॥

(२) अत्र च संप्रदायविद् आख्यायिकां संप्रचक्षते – कश्चित् किल राजपुत्रो जातमात्र एव मातापितृभ्याम् अपविद्धो व्याधगृहे संवर्धितः। सोऽमुष्यवंश्यताम् अजानन् व्याधजातिप्रत्ययो व्याधजातिकर्माण्येव अनुवर्तते न राजास्मीति राजजातिकर्माण्यनुवर्तते। यदा पुनः कश्चित् परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यतां जानन् अमुष्यपुत्रतां बोधयति ' न त्वं व्याधः· अमुष्य राज्ञः पुत्रः कथञ्चिद् व्याधगृहमनुप्रविष्टः'-इति । स एवं बोधितः, त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितृपैतामहीम् आत्मनः पदवीम् अनुवर्तते 'राजाऽहमस्मि' इति । तथा किलायं परस्माद् अग्निविस्फुलिङ्गादिवद् तज्जातिरेव विभक्तः ; इह देहेन्द्रियादिगहने प्रविष्टः असंसारी सन् देहेन्द्रियादिसंसारधर्ममनुवर्तते, ' देहेन्द्रियसङ्घातोऽस्मि, कृशः, स्थूलः, सुखी· दुःखी ' इति परमात्मताम् अजानन् आत्मनः । ' न त्वमतदात्मकः, परमेव ब्रह्मासि असंसारी ' इति प्रतिबोधित आचार्येण हित्वा एषणात्रयानुवृत्तिं 'ब्रह्मैवास्मि' इति प्रतिपद्यते ॥ बृ· भा· २–१–२०, आ· पा· २९८.

अत्रानन्दगिरिटीका –

(1) 'तत्त्वमस्यादिवाक्यम् ऐक्यपरम् । तच्छेषः सृष्ट्यादिवाक्यम् –इति उक्तेऽर्थे द्रविडाचार्यसंमतिमाह ' ॥

आ· गि·, आ· बृ· भा·, पा· २९८.

[अत्रोदाहृतो द्रविडाचार्यो रामानुजभाष्ये परामृष्टाद् द्रमिडाचार्याद्भिन्नः इति भ्रान्ताः केचित् यथोक्ताख्यायिका निर्विशेषात्मवादिमते न संभवतीत्याक्षिपन्ति । विस्फुलिङ्गवाक्यानन्तरं 'तस्योपनिषत् सत्यस्य सत्यमिति' इति वाक्ये, 'अथ नामधेयम् ' इत्यादौ च निर्विशेषस्य विवक्षा न घटेत – इत्यभिप्रेत्यैव द्रमिडाचार्यैः राजकुमारनयः प्रदर्शितः । न हि राज्ञः तत्पुत्रस्य चैक्यं कस्यचित् संमतम् । न वा राज्ञः स्थितिदशायां तत्पुत्रस्यासमर्थस्य राज्यं संभवति । राज्यसंभवेऽपि भर्म एव प्रतिपन्नः स्यात् , न तु जीवब्रह्माभेदप्रतिपत्तिः संभवति ' (गू· सं·, पा· २४३) इति । तद्

विसंगतं चोद्यम् । न हि राजपुत्राख्यायिकायां राजपुत्रस्य राज्ञा सह एकत्वं विवक्ष्यते कारुणिकोपदर्शन. किं तु व्याधत्वबाधनेनामुष्यपुत्रता राजश्रीप्राप्तियोग्यत्वं च । न च राज्ञो जीवतः स्थितिरस्थितिर्वा परामृष्टं दृश्यते शाङ्करभाष्यस्थाख्यायिकायाम् इति ॥ ]

इमे तु द्रविडाचार्याः बृहदारण्यकभाष्ये उत्पत्त्यादिश्रुतीनामात्मैकत्वपरत्ववादस्य सांप्रदायिकत्वप्रदर्शनार्थमुदाहृता निरुपाधिकब्रह्मवादिनो ब्रह्मणस्तथ्यत एव रूपवत्त्वमनुमन्यमानात् द्रमिडाचार्याद् भिन्ना एव भवितुमर्हन्तीति स्फुटम् । रामानुजोदाहृतद्रमिडो हि एवं वदति स्म –

(2) न वा मायामात्रम् अञ्जसैव विश्वसृजो रूपम् । तत्तु न चक्षुषा ग्राह्यम्, मनसा त्वकलुषेण साधनान्तरवता गृह्यते, 'न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेन' – इति श्रुतेः । न ह्यरूपाया देवतायाः रूपमुपदिश्यते ; यथाभूतवादि हि शास्त्रम् । 'यथा माहारजतं वासः', 'वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णम्' इति प्रकरणान्तरनिर्देशात् ॥ वे. सा. १-१ २१, पा. २०६.

अत्र 'स्यात् परमेश्वरस्यापि इच्छावशात्, मायामयं रूपम्, साधकानुग्रहार्थम्' (सू. भा. १-१-२०, पा. ४५) इति भगवत्पादैर्लिखितं दृष्ट्वा तदसहमानेन अनेन द्रमिडाचार्येण पारमार्थिकरूपवत्त्वम् उपपिपादयिषता इत्थम् अलेखि – इति बलवती संभावना अस्ति । यतो नान्यत्र भगवत्पादीयभाष्यात् केनचिन्मायामयं रूपमीश्वरस्य– इति प्रतिपादितम् उपलभ्यते, येन तदेवानूदितं स्यादिति संभाव्येत । न भगवत्पादैस्तच्छिष्यैर्वार्तिककारैर्वा मनसैव ग्राह्यं भगवद्रूपं सत्यमेव– इति पक्षः क्वचिदनूद्य खण्डितोऽस्ति । अतः सिद्धमिदं यदसौ द्रमिडाचार्यो भगवत्पादेभ्योऽर्वाचीन एवेति ॥

अपि चेमे द्रविडाचार्या निर्विशेषात्मवादिन एवेत्यत्र सुनिश्चायकं प्रमाणान्तरमप्यस्ति । यत्कारणं 'न निरोधो न चोत्पत्तिः' (गौ. का. २–३२) इति कारिकाभाष्ये इदं वाक्यं वर्तते –

(३) तस्मात्, निर्विशेष एवात्मनि सुखित्वादयो विशेषाः कल्पिताः । यत्तु असुखित्वादिशास्त्रमात्मनः तत् सुखित्वादिविशेषनिवृत्त्यर्थमेवेति सिद्धम् । 'सिद्धं तु निवर्तकत्वात्' इत्यागमविदां सूत्रम् ॥

आ. गौ. का. भा. २–३२, पा. २०५.

अत्रानन्दगिरिर्व्याचष्टे –

(3) उक्तेऽर्थे द्रविडाचार्यसंमतिमाह – सिद्धं त्विति ॥

इति । अतो व्यक्तमेतद् यत् तत्त्वमसीति वाक्यस्य जीवस्याद्वितीय-निर्विशेषब्रह्मतादात्म्यावबोधकत्वमातिष्ठमाना इमे प्राचीनाचार्या अन्ये एव विशिष्टाद्वैतिद्रमिडाचार्यादिति । अत एव स्यान्नूनं श्रीरामानुजाचार्यो राजपुत्राख्यायिकां प्राचीनद्रविडाचार्योपन्यस्तां अन्यथैव स्वसंप्रदायानु-गुणं विपरिणमय्य वर्णयितुं प्रववृते श्रीभाष्ये –

(4) कश्चिद् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गाद् भ्रष्टो नष्ट इति राज्ञा विज्ञातः, स्वयं चाज्ञातपितृकः केनचिद् द्विजवर्येण वर्धितोऽधिगतवेदशास्त्रः, षोडशवर्षः, सर्वकल्याणगुणाकर-स्तिष्ठन् ' पिता ते सर्वलोकाधिपतिः, गाम्भीर्यौदार्यवात्सल्यसौशील्य-शौर्यवीर्यपराक्रमादिगुणसंपन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठति ' इति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणोति चेत्, तदानीमेव ' अहं तावत्, जीवतः पुत्रः, मत्पिता च सर्वसंपत्समृद्धः ' इति निरतिशयहर्षसमन्वितो भवति । राजा च स्वपुत्रं जीवन्तम्, अरोगम्, अतिमनोहरदर्शनम्, विदितसकलवेद्यं श्रुत्वा अवाप्तसमस्तपुरुषार्थो भवति । पश्चात् तदुपादाने च प्रयतते । पश्चात् तावुभौ सङ्गच्छेते च ॥

श्रीभाष्यम्, १–१–४, पा. १५७.

इति । अत्र च 'अस्ति भगवान्' इत्यादिवाक्येन तत्सद्भावं तत्स्वरूपं च ज्ञात्वा तदुपासनाय प्रयतते जीवः, भगवांश्च तमनुगृह्णाति–इत्यस्मिन्नर्थे प्रणीता आख्यायिकेति स्पष्टम् ॥

इमे एव द्रविडाचार्याः, छान्दोग्यभाष्यमपि विरचयामासुरिति श्रूयते । तत्तु भाष्यम् इदानीं नोपलभ्यते । तद्विषये आनन्दगिरि-टीकायाम् एवं लिखितमस्ति –

(5) अथ पाठक्रममाश्रित्यापि द्राविडं भाष्यं प्रणीतं तत् किमनेन ?–इत्याशङ्क्याह 'अल्पग्रन्थम्' इति ॥ आ. छां. भा., पा. १.

द्रविडाचार्यवाक्यानि अन्यत्रापि (छां. भा. टीका, पा. १४६ ; वा.भा. १–१–४, पा. १२२) समुद्धृतानि दृश्यन्ते । तेषां प्रकृतविचारे अनुपकारकत्वात् न तान्यत्र लिखामः । प्रसङ्गवशात्, ऐतरेयोपनिष-द्भाष्यगतापि काचिदाख्यायिका अत्रोदाह्रियते –

(४) " कथं तर्हि तस्य स म आत्मेति वेदनम् ? ब्रूहि केन प्रकारेण तमहं 'स म आत्मा' इति विद्याम् । अत्राख्यायिकामाचक्षते–कश्चित् किल मनुष्यो मुग्धः कैश्चिदुक्तः कस्मिंश्चिदपराधे सति 'धिक् त्वाम्, नासि मनुष्यः' इति । स मुग्धतया आत्मनो मनुष्यत्वं प्रत्याययितुं कञ्चिदुपेत्य आह 'ब्रवीतु भवान् कोऽहमस्मि' इति । स तस्य मुग्धतां ज्ञात्वा आह 'क्रमेण बोधयिष्यामि' इति । स्थावराद्यात्मभावम् अपोह्य 'न त्वममनुष्यः' इत्युक्त्वा उपरराम । स तं मुग्धः प्रत्याह 'भवान् मां बोधयितु प्रवृत्तः। तूष्णीं बभूव, किं न बोधयति ?' इति । तादृगेव तद् भवतो वचनम् । 'नासि अमनुष्यः' इत्युक्तेऽपि मनुष्यत्वम् आत्मनो न प्रतिपद्यते यः स कथं 'मनुष्योऽसि' इत्युक्तोऽपि मनुष्यत्वमात्मनः प्रतिपद्येत ॥ आ. ऐ. भा. प्रथमाध्यायगतोपसंहार-भाष्ये चर्चा । पा. ६८.

सेयमाख्यायिकाप्येतेषामेव द्रविडाचार्याणामिति संभावयितुं शक्यते । शास्त्रस्य अतद्धर्मनिवर्तकत्वेनैव प्रामाण्यमिति ह्यत्रोच्यत इति । आनन्दगिरिस्तु न तथा उल्लिख्य व्याचष्टे ; 'सोपहासमुत्तरमाह' इत्येतावदेव लिखति । तामेताम् आख्यायिकां पुनरप्यागामिकिरणे समालोचयिष्यामः ॥

१०. आचार्यो ब्रह्मनन्दी – द्रविडाचार्याः समालोचिताः छान्दोग्योपनिषदं पाठक्रममाश्रित्यैव स्वभाष्येण विभूषयामासुरिति प्राक् (पा.२१) कथितम् आनन्दगिरिवाक्यं प्रमाणीकृत्य । सङ्क्षेपशारीरकप्रणेता **सर्वज्ञात्ममुनिस्तु** छान्दोग्यवाक्यकारत्वेन प्रथितं ब्रह्मनन्दिनमप्येकं शाङ्करसम्प्रदायस्थत्वेन समुदाजहार । सङ्क्षेपशारीरकटीकाकारश्च **मधुसूदनसरस्वती** 'ब्रह्मनन्दिवाक्यानां भाष्यकर्ता द्रविडाचार्यः' इत्याह । तत्रेमे श्लोका भवन्ति –

(१) आत्रेयवाक्यमपि संव्यवहारमात्रं
कार्यं समस्तमिति नः कथयाम्बभूव ।
सत्कार्यवादविषये न हि दोषराशि
र्मायामये भवितुमुत्सहते विरोधात् ॥
सं. शा. ३-२१७.

[अत्र वाक्यकारस्य ब्रह्मनन्दिन अत्रिगोत्रोद्भवत्वं कथितम् ॥]

(२) पूर्वं विकारमुपवर्ण्य शनैः शनैस्तद्-
दृष्टिं विसृज्य निकटं परिगृह्य तस्मात् ।
सर्वं विकारमथ संव्यवहारमात्र-
मद्वैतमेव परिरक्षति वाक्यकारः ॥ सं. शा. ३-२२०.

अत्र व्याख्यानकर्ता मधुसूदनसरस्वती एवं लिखति स –

(1) छान्दोग्यवाक्यकारेण ब्रह्मनन्दिनापि पूर्वपक्षे असतः सतश्च उत्पत्तौ दोषमुक्त्वा सांव्यवहारिकमायामयत्वपक्षेण समाधानमुक्तम् – 'नासत उत्पत्तिः, अनिष्पाद्यत्वात् । नापि सतः, प्रवृत्त्यानर्थक्यात्, सत्त्वाविशेषात् । अभिव्यक्त्यर्थमिति चेत् । न, तस्या अपि सत्त्वात्, प्रवृत्तिनित्यत्वाच्च सदा अभिव्यक्तिप्रसङ्गः । न । संव्यवहारमात्रत्वाद्' इति । तद्वचनं चोक्तन्यायोपोद्बलितवाचारम्भणादिश्रुतिमूलकम् अवश्यमुपादेयम् इत्याशयेनाह ॥ सं. शा., पा. २७६.

[कल्पतरुग्रन्थे तु "ब्रह्मनन्दिना हि 'नासतः अनिष्पाद्यत्वात्, प्रवृत्त्यानर्थक्यं तु सत्त्वाविशेषात् – इति सदसत्पक्षप्रतिक्षेपेण पूर्वपक्षमादर्श्य 'न । संव्यवहारमात्रत्वात्' इति अनिर्वचनीयता सिद्धान्तिता । अतः 'परिणामस्तु' इति मिथ्यापरिणामाभिप्रायम्" इति दृश्यते ॥ क. त. १-४-२७, पा. ४२९. अतो ब्रह्मनन्दिवाक्यम् अर्थतः पठितमन्यतरत्र – इति भाति ॥]

अत्र द्रविडाचार्यैः साक्षादेवोपनिषद्भाष्यं रचितमिति आनन्दगिरिवाक्यात् प्रतीयते । तत्किं वाक्यव्याख्यानद्वारा उपनिषद्भाष्यमित्युपचर्यते, अथवा वाक्यव्याख्यानमपि अन्यदेव ? – इत्यत्र प्राचीनग्रन्थतत्त्वशोधका एव प्रमाणम् । सर्वथापि तु द्रविडभाष्यकार इव वाक्यकारोऽपि ब्रह्मनन्दी शाङ्करसंप्रदायस्थ आचार्य इत्यविवादम् ॥

अत्रापि केचिद्वदन्ति – ब्रह्मनन्दी विशिष्टाद्वैतिसंमतटङ्क एव, स एव च छान्दोग्यवाक्यकारः, तद्व्याकर्ता च रामानुजाद्युपन्यस्तद्रमिडाचार्यादनन्य एव–इति च । तन्न शुद्धम् । विशिष्टाद्वैतीतरवेदान्तिभिः कैश्चिदपि वाक्यकारपरामर्शकैः ब्रह्मनन्दिनष्टङ्काभिधानेन टङ्कितत्वाभावात् । तेषां द्रमिडद्रविडयोरैक्याङ्गीकारादर्शनाच्च । अद्वैतिभिर्हि 'द्रविडाचार्यैः' इत्यवर्गीयवकारमध्यममेवाभिधानं पठ्यते न तु

पवर्गपञ्चमाक्षरयुतम् । वेदार्थसंग्रहे रामानुजसमुदाहृतद्रमिडवाक्यस्य सर्वज्ञात्ममुन्युदाहृतभाष्यकारवाक्यसारूप्याभावाच्चैतदेवमिति मन्तव्यम् । तथा हि रामानुजाचार्याः –

(2) यथोक्तं वाक्यकारेण 'युक्तं तद्गुणकोपासनम्' इति । व्याख्यातं च द्रमिडाचार्येण विद्याविकल्पं वदता 'यद्यपि सच्चित्तो न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत्, तथापि अन्तर्गुणामेव देवतां भजत इति तत्रापि सगुणैव देवता प्राप्यते' ॥ वे. सं., पा. १४३.

इति विशिष्टाद्वैतिसंमतद्रमिडाचार्यवाक्यम् तन्मूलिटङ्कवाक्यं च । सङ्क्षेपशारीरकोक्तद्रविडाचार्यवाक्ये तु 'अन्तर्गुणा भगवती परा देवता प्रत्यग्गुणा' इति न तु 'सगुणा' इतीति वैषम्यम् ॥

एवं हि तत्र पूर्णः श्लोकः –

अन्तर्गुणा भगवती परदेवतेति
प्रत्यग्गुणेति भगवानपि भाष्यकारः ।
आह स्म यत्तदिह निर्गुणवस्तुवादे
संगच्छते न तु पुनः सगुणप्रवादे ॥ सं. शा. ३-२२१.

तस्मात्, वेदार्थसंग्रहोदिताभिप्रायकवाक्यानां पूर्ववेदान्ताचार्यसंमतत्वेन रामानुजपरमगुरुयामुनाचार्येभ्यः प्रागपि यैः कैश्चिदुदाहृतत्वेन यावन्न दृग्गोचरीक्रियते, यावच्च शङ्कराचार्यकालीनग्रन्थेषु ततः प्राक्कालीनग्रन्थेषु वा विशिष्टाद्वैतपरामर्शकवाक्यानि नोपलभ्यन्ते, तावत् द्रमिडाचार्यद्रविडाचार्यैक्यवत् टङ्कब्रह्मनन्दिनोरैक्यमप्यनिर्धारितमेव तिष्ठतीत्यस्मन्मतिः ॥

११. उपवर्षाचार्यः – एवम् उपवर्षोऽप्यन्यो भगवत्पाद-संप्रदायस्थः पूर्वाचार्य इति भाष्यवाक्यप्रामाण्यादवगम्यते । तद्यथा –

(१) अत एव च भगवता उपवर्षेण प्रथमे तन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ 'शारीरके वक्ष्यामः' इत्युद्धारः कृतः ॥

सू. भा. ३-३-५३, पा. ४२४.

इदं हि पूर्वमीमांसाशास्त्रे देहव्यतिरिक्तात्मसद्भावप्रतिष्ठापकसूत्राभावात् 'इत एव चाकृष्याचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितम्' इत्युक्त्वा तदनन्तरं लिखितं वाक्यम् – इत्यत उपवर्षाचार्यः पूर्वमीमांसामिव शारीरकमीमांसामप्यधिकृत्य वृत्तिं व्यररचत् इति भाष्याभिप्रायो गम्यते । तं च 'भगवान्' इति विशेषणेन पूजयन् भाष्यकारो स्व-संप्रदायनिष्ठपूर्वाचार्यपरम्परायां निवेशयति स्मेति च ॥

अत्रापि केचित् पुरातनप्रथितवेदान्तिनां नामानि स्वसंप्रदाय-कर्तृपरम्परामध्ये निवेशयितुकामाः प्राहुः –

(1) "वृत्तिकारस्य बोधायनस्यैव 'उपवर्षः' इति स्यान्नाम"

त. टी., गू. सं., पा. ८ ख.

इति । तत्रेदं वक्तव्यम् – "अथ गौः – इत्यत्र कः शब्दः ? 'गकारौकारविसर्जनीयाः' इति भगवानुपवर्षः" (शा. भा. जै. सू. १-१-५, पा. १०) इत्युपवर्षं भगवच्छब्देन व्यपदिष्टवता आचार्यशबर-स्वामिना न क्वापि बोधायनाभिधानं समुपात्तम् । शङ्करभगवत्पादै-स्तच्छिष्यैर्वा अद्वैतिभिर्बोधायनो न कटाक्षेणापि वीक्षितः । अपि च 'भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः सञ्चिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते' (श्री. भा. १-१-१) इति रामानुजाचार्याणां लिट्प्रयोगादुन्नेतुं शक्यते, श्रीभाष्यप्रणयनकालेऽपि

बोधायनवृत्तिः संपूर्णतया न दृक्पथं याता ; तदात्वे प्रचलितपूर्वाचार्य-मतमनुसृत्यैव तु भाष्यं निर्मितं तैः – इति । अस्ति च जनश्रुतिः – रामानुजाचार्या वृत्त्यन्वेषणार्थं काश्मीरान् गतास्तत्र बहुक्लेशात् सकृदवलोकनायैव लब्धानुज्ञाः, तं ग्रन्थमासेदुस्तत्रत्यग्रन्थालयात्, तच्छिष्यश्च कश्चिदेकसन्धिग्राही श्रीभाष्यलेखनसमये वृत्तिग्रन्थगतानि वाक्यानि स्वेनैकवारं पठितानि तत्र तत्राचार्यान् स्मारयामास इति । श्रीभाष्येऽपि अत्यल्पसङ्ख्याकान्येव वृत्तिवाक्यानि समुदाहृतानि रामानुजाचार्यैः । तत्रैवं स्थिते ग्रन्थवृत्ते वृत्तिग्रन्थप्रणेता को वा स्यादित्ययमेव प्रश्नस्तावन्न सुखेन निर्णेय इति प्राप्नोति । अपि च विशिष्टाद्वैतिन एव **महाचार्याः** स्वकृतपाराशर्यविजये उपवर्षबोधायनयोर्भेदमेवास्थितवन्तः–इत्यपि विज्ञायते (गू. सं., पा. ८ ख) ॥

तदेवंविधे व्यतिकरे यत् केचन विशिष्टाद्वैतिनः प्राहुः – श्रीभाष्यकारैर्वृत्तिकारवाक्यतद्भाष्यकर्तॄणां बोधायनटङ्कद्रमिडाचार्याणाम्, उपवर्षब्रह्मनन्दिद्रविडाचार्यापरनामभिर्व्यपदिश्यमानानां जीवभिन्न-सविशेषब्रह्मपरिणामवादे ऐकमत्यस्य स्फुटं श्रीभाष्यादिषु दर्शितत्वात् यदद्वैतिनो वृत्तिकारमतं दूषयन्ति वाक्यकारादींस्तु निर्विशेषाद्वैत-वादित्वेन स्वीकुर्वन्ति, तदनुचितमिति – तत्र न किञ्चिद् वक्तव्यमव-शिष्यते बोधायनादीनाम् उपवर्षादिभिरैक्यस्य अद्यापि कथमप्यनिश्चित-त्वादिति ध्येयम् ॥

**१२. द्वैतिवेदान्तिनोऽपि नासन् भाष्यकारकाले –** एवं तावत्, विशिष्टाद्वैतसंप्रदायस्थानां वृत्तिकारवाक्यकारभाष्यकाराणां तदन्येषां वा शङ्करभगवत्पादसमये तत्पूर्वं वा अस्तित्वे न प्रमाणम्

उपलभ्यते इति प्रतिपादितम् । आनन्दतीर्थसम्प्रदायस्थानां तु नामापि न श्रूयते स्म तदात्वे इति न पृथग् वक्तव्यम् । यत्कारणम् आनन्दतीर्थाः केवलनिमित्तभूतेश्वरकारणवादिनः । निमित्तकारणवादश्च भाष्ये वेदबाह्यत्वेन निन्दितः । तद्यथा – पत्युरधिकरणभाष्ये –

(१) 'इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते । तत्कथमवगम्यते? 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात', 'अभिध्योपदेशाच्च' – इत्यत्र प्रकृतिभावेन अधिष्ठातृभावेन च उभयस्वभावस्य ईश्वरस्य स्वयमेव आचार्येण प्रतिष्ठापितत्वात् । यदि पुनरविशेषेण ईश्वरकारणवादमात्रमिह प्रतिषिध्येत, पूर्वोत्तरविरोधाद् व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत । तस्मात्, अप्रकृतिरधिष्ठाता केवलं निमित्तकारणम् ईश्वरः – इत्येष पक्षो वेदान्तविहितब्रह्मैकत्वप्रतिपक्षत्वात् यत्नेनात्र प्रतिषिध्यते । सा चेयं वेदबाह्येश्वरकल्पना अनेकप्रकारा ॥

सू. भा २-२-३७. पा २५६.

रामानुजाचार्यास्तु ब्रह्मपरिणामवादिनः । आचार्या अपि

(२) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ सू. भा. २-१-२७, पा. २१३.

इति व्यावहारिकदृष्ट्या परिणामवादम् ऊरीचक्रुः । 'बद्धान्मुक्ताच्च जीवात् अत्यन्तविलक्षणः परमात्मा' इति वदन्तस्तु वेदान्तिनः परिणामवादिषु मध्ये भगवत्पादकाले नासन् इत्येतावत्तु अस्माभिः प्रदर्शितं गतेन ग्रन्थेन । केवलनिमित्तकारणवादिनस्तु वेदबाह्या इति प्रथा आसीत् भगवत्पादसमये इति उपर्युदाहृतवाक्यात् सुस्पष्टमवगम्यते । तेन आनन्दतीर्थीयजातीयकवेदान्तप्रस्थानं नैवोत्पन्नमभूत् तदात्वे इति निर्विवादं सिद्धम् ॥

१३. उपसंहारः – तदेवमन्तं प्रतानितया किरणद्वयगतचिन्तया इदमेकं सुनिष्पन्नम् यदद्वैतमेव सर्वैर्वेदान्तैः प्रतिपिपादयिषितो राद्धान्तः, द्वैतविशिष्टाद्वैतादिवादिनस्तु नैवासन् शङ्करभाष्यप्रणयनसमये, ततः प्राग् वा–इति। यद्यपि प्राचीनाद्वैतिनः सर्वेऽपि जीवब्रह्मैक्यं नियमेनानुमेनिरे, तथापि तेष्वेव केचित् जैवं रूपं पारमार्थिकं मन्यमाना यत्किञ्चित्साधनायत्तमेव जीवस्य परमात्मना ऐक्यमिति मतमास्थिताः; एवं जगद्ब्रह्मणोः संबन्धविषये मोक्षतत्साधनविशेषविषये च ते बहुधा विप्रतिपन्ना आसन्निति भगवत्पादीयभाष्यानूदितविविधवृत्तिकारमतसमालोचनादवगम्यते॥

श्रीशङ्करभगवत्पादैरपीतरवृत्तिकारैरिव अद्वैतमेव वेदान्तार्थ इत्यभ्युपागमि। अनितरसाधारणप्रक्रियाविशेषस्यैव वेदान्तसम्मतत्वेन स्वीकरणात्तु तेषां प्रस्थानं सकलेतरविलक्षणमभूत्। सा च प्रक्रिया न तैरभिनवमुपज्ञाता, किं तु अनादिकालप्रवृत्तसंप्रदायागतैवेति श्रीगौडपादद्रविडब्रह्मनन्द्यादिप्राचीनाचार्यप्रमाणवाक्योपलम्भादवगम्यते। तैरेव च वाक्यैः कतिभिश्चिदत्रोदाहृतैर्दिङ्मात्रं तस्य प्रक्रियाविशेषस्य निश्चेतुं शक्नुवन्त्येव सूक्ष्ममतयः। यथा च सैवैका श्रुतियुक्त्यनुभवसङ्गानेन वेदान्तार्थं गमयन्ती साम्प्रतमपि विजयते, तथा समनन्तरोत्तरकिरणे दर्शयिष्यत इति सर्वं शिवम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे शाङ्करसंप्रदायनिर्णयो नाम द्वितीयः किरणः

---

अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्. १०००, २०-४-१९६४.

*(continued from the inside of the front-ccver)*

The complete series itself having been entitled Suddha-Shankara-Prakriya-Bhaskarah (The Sun displaying the unique method of Vedanta according to Shankara), each of the main divisions has been named a 'Kiranah' a ray of thought. It is expected to shed sufficient light on the particular topic dealt with, so that the reader need no more entertain the hazy ideas that have gained currency among the uncritical Vedantins.

The first instalment that is now before you attempts to offer a succient and clear idea of the one doctrine of the Upanishads presented in various ways by different system-builders, and seeks to show how Shankara's own interpretation is based on a hoary tradition.

Each brochure in the series is purposely priced as low as possible so that it may be within the reach of all readers interested in the subject. Free distribution of a limited number of copies among qualified sannyasins and pandits at the discretion of the Karyalaya is under contemplation. This object can be achieved only if munificent donors come forward to finance the undertaking. Our heart-felt thanks are due to the **Vedanta-Vichara Sangha of Mysore** for having taken the initiative in this direction with regard to the first instalment.

Holenarsipur,
5-5-1964

*Y. NARASAPPA,*
*Chairman of the Working Committee.*

## शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

## BACK-TO-SHANKARA SERIES

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च –**

The Isa, Kena, Kathaka and Mundaka Upanishads and the Sikshavalli of the Taittiriya, critically edited separately with the Bhashya and notes by Swamy Satchidanandendra Saraswati.

**सुगमा – अध्यासभाष्यस्य नवीनव्याख्या –**

A new original sub-commentary on the Adhyasa Bhashya, pointing out a straight and smooth way to the essentials of the Vedanta method. All later undesirable accretions cleared out of the way.

**माण्डूक्यरहस्यविवृतिः – उपनिषदो गौडपादीयकारिकाणां च अभिनवा व्याख्या –**

This is the first attempt of its kind to present both Gaudapada and Shankara in their true perspective. Suspected Buddhistic influence on Gaudapada has been effectively explained away.

**आनन्दवल्ली भृगुवल्ली च – सभाष्या, भाष्यार्थविमर्शिनीसहिता –**

All the knotty points in the Bhashya have been resolved. Contains a critical review of all the important objections of adverse critics against Shankara's interpretation.

*Apply for the Descriptive Catalogue*
*to*

# THE ADHYATMA PRAKASHA KARYALAYA,

## HOLENARSIPUR.